



**ব্রহ্ম সংহিতা**

হ্মসংহিতা (সংস্কৃত: □□□□□□□□□□□□□) হলো একটি সংস্কৃত পঞ্চরাত্র পাঠ্য, যার শুরু ব্রহ্মা কর্তৃক উচ্চারিত বিষ্ণু ও তাঁর অবতার যেমন কৃষ্ণের মহিমান্বিত প্রার্থনার শ্লোকের সমন্বয়ে। পাঠ্যটি গৌড়ীয় বৈষ্ণবধর্মের মধ্যে সম্মানিত। এটিতে কৃষ্ণের আবাস, গোলোকের অত্যন্ত রহস্যময় বর্ণনা রয়েছে। পাঠ্যের একটি অংশ, পঞ্চম অধ্যায়ের 62 টি শ্লোক, যা পূর্বে কয়েক শতাব্দী ধরে হারিয়ে গিয়েছিল, চৈতন্য মহাপ্রভু সেটি পুনঃআবিষ্কার করেছিলেন। ব্রহ্মসম্প্রদায়ের মধ্বাচার্য তার ব্রহ্মসূত্রের ভাষ্যতে একাধিকবার ব্রহ্মসংহিতার উদ্ধৃত করেছেন।

ঈশ্বরঃ পরমঃ কৃষ্ণঃ সচ্চিদানন্দ-বিগ্রহঃ
অনাদিঃ আদিঃ গোবিন্দঃ সর্ব কারণ কারণম্

কৃষ্ণ, যিনি গোবিন্দ নামে পরিচিত, তিনি হলেন পরমেশ্বর ভগবান। তার দেহ সচ্চিদানন্দময়। তিনিই সকলের আদি। তার কোন উৎপত্তি নেই এবং তিনিই সকল কারণের প্রধান কারণ।

ঈশ্বরঃ পরমঃ কৃষ্ণঃ সচ্চিদানংদবিগ্রহঃ ।
অনাদিরাদির্গোবিংদঃ সর্বকারণকারণম্ ॥ 1 ॥

সহস্রপত্রকমলং গোকুলাখ্য়ং মহত্পদম্ ।
তত্কর্ণিকারং তদ্ধাম তদনংতাশসংভবম্ ॥ 2 ॥

কর্ণিকারং মহদ্য়ংত্রং ষট্কোণং বজ্রকীলকম্
ষডংগ ষট্পদীস্থানং প্রকৃত্য়া পুরুষেণ চ ।
প্রেমানংদমহানংদরসেনাবস্থিতং হি যত্
জ্য়োতীরূপেণ মনুনা কামবীজেন সংগতম্ ॥ 3 ॥

তত্কিংজল্কং তদংশানাং তত্পত্রাণি শ্রিয়ামপি ॥ 4 ॥

চতুরস্রং তত্পরিতঃ শ্বেতদ্বীপাখ্যমদ্ভুতম্ ।
চতুরস্রং চতুর্মূর্তেশ্চতুর্ধাম চতুষ্কৃতম্ ।
চতুর্ভিঃ পুরুষার্থৈশ্চ চতুর্ভির্হেতুভির্বৃতম্ ।
শূলৈর্দশভিরানদ্ধমূর্ধ্বাধো দিগ্বিদিক্ষ্বপি ।
অষ্টভির্নিধিভির্জুষ্টমষ্টভিঃ সিদ্ধিভিস্তথা ।
মনুরূপৈশ্চ দশভির্দিক্পালৈঃ পরিতো বৃতম্ ।
শ্য়ামৈর্গৌরৈশ্চ রক্তৈশ্চ শুক্লৈশ্চ পার্ষদর্ষভৈঃ ।
শোভিতং শক্তিভিস্তাভিরদ্ভুতাভিঃ সমংততঃ ॥ 5 ॥

এবং জ্য়োতির্ময়ো দেবঃ সদানংদং পরাত্পরঃ ।
আত্মারামস্য় তস্য়াস্তি প্রকৃত্য়া ন সমাগমঃ ॥ 6 ॥

মায়য়াঽরমমাণস্য় ন বিয়োগস্তয়া সহ ।
আত্মনা রময়া রেমে ত্যক্তকালং সিসৃক্ষয়া ॥ 7 ॥

নিয়তিঃ সা রমাদেবী তত্প্রিয়া তদ্বশং তদা ।
তল্লিংগং ভগবান্ শংভুর্জোতিরূপঃ সনাতনঃ ।
যা যোনিঃ সাপরাশক্তিঃ কামো বীজং মহদ্ধরেঃ ॥ 8 ॥

লিংগয়োন্য়াত্মিকা জাতা ইমা মাহেশ্বরী প্রজাঃ ॥ 9 ॥

শক্তিমান্ পুরুষঃ সোঽয়ং লিংগরূপী মহেশ্বরঃ ।
তস্মিন্নাবিরভূল্লিংগে মহাবিষ্ণুর্জগত্পতিঃ ॥ 10 ॥

সহস্রশীর্ষা পুরুষঃ সহস্রাক্ষঃ সহস্রপাত্ ।
সহস্রবাহুর্বিশ্বাত্মা সহস্রাংশঃ সহস্রসূঃ ॥ 11 ॥

নারাযণঃ স ভগবানাপস্তস্মাত্সনাতনাত্ ।
আবিরাসীত্কারণার্ণো নিধিঃ সংকর্ষণাত্মকঃ ।
যোগনিদ্রাং গতস্তস্মিন্ সহস্রাংশঃ স্বয়ং মহান্ ॥ 12 ॥

তদ্রোমবিল জালেষু বীজং সংকর্ষণস্য় চ ।
হৈমান্য়ংডানি জাতানি মহাভূতাবৃতানি তু ॥ 13 ॥

প্রত্য়ংডমেবমেকাংশাদেকাংশাদ্বিশতি স্বযম্ ।
সহস্রমূর্ধা বিশ্বাত্মা মহাবিষ্ণুঃ সনাতনঃ ॥ 14 ॥

বামাংগাদসৃজদ্বিষ্ণুং দক্ষিণাংগাত্প্রজাপতিম্ ।
জ্য়োতির্লিংগময়ং শংভুং কূর্চদেশাদবাসৃজত্ ॥ 15 ॥

অহংকারাত্মকং বিশ্বং তস্মাদেতদ্ব্যজাযত ॥ 16 ॥

Published on: Jul, 30 2025 14:36

অথ তৈস্ত্রিবিধৈর্বেশৈর্লীলামুদ্বহতঃ কিল ।
যোগনিদ্রা ভগবতী তস্য শ্রীরিব সংগতা ॥ 17 ॥

সিসৃক্ষায়াং ততো নাভেস্তস্য পদ্মং বিনির্যযৌ ।
তন্নালং হেমনলিনং ব্রহ্মণো লোকমদ্ভুতম্ ॥ 18 ॥

তত্ত্বানি পূর্বরূঢানি কারণানি পরস্পরম্ ।
সমবায়াপ্রয়োগাচ্চ বিভিন্নানি পৃথক্ পৃথক্ ।
চিচ্ছক্ত্যা সজ্জমানোঽথ ভগবানাদিপূরুষঃ ।
যোজযন্মাযযা দেবো যোগনিদ্রামকল্পযত্ ॥ 19 ॥

যোজয়িত্বা তু তান্যেব প্রবিবেশ স্বয়ং গুহাম্ ।
গুহাং প্রবিষ্টে তস্মিংস্তু জীবাত্মা প্রতিবুধ্যতে ॥ 20 ॥

স নিত্যো নিত্যসংবংধঃ প্রকৃতিশ্চ পরৈব সা ॥ 21 ॥

এবং সর্বাত্মসংবংধং নাভ্যাং পদ্মং হরেরভূত্ ।
তত্র ব্রহ্মাভবদ্ভূযশ্চতুর্বেদী চতুর্মুখঃ ॥ 22 ॥

স জাতো ভগবচ্ছক্ত্যা তত্কালং কিল চোদিতঃ ।
সিসৃক্ষায়াং মতিং চক্রে পূর্বসংস্কারসংস্কৃতঃ ।
দদর্শ কেবলং ধ্বাংতং নান্যত্কিমপি সর্বতঃ ॥ 23 ॥

উবাচ পুরতস্তস্মৈ তস্য দিব্যা সরস্বতী ।
কামঃ কৃষ্ণায় গোবিংদ হে গোপীজন ইত্যপি ।
বল্লভায় প্রিয়া বহ্নের্মংত্রং তে দাস্যতি প্রিয়ম্ ॥ 24 ॥

তপস্ত্বং তপ এতেন তব সিদ্ধির্ভবিষ্যতি ॥ 25 ॥

অথ তেপে স সুচিরং প্রীণন্ গোবিংদমব্যযম্ ।
শ্বেতদ্বীপপতিং কৃষ্ণং গোলোকস্থং পরাত্পরম্ ।
প্রকৃত্যা গুণরূপিণ্যা রূপিণ্যা পর্যুপাসিতম্ ।
সহস্রদলসংপন্নে কোটিকিংজল্কবৃংহিতে ।
ভূমিশ্চিংতামণিস্তত্র কর্ণিকারে মহাসনে ।
সমাসীনং চিদানংদং জ্যোতিরূপং সনাতনম্ ।
শব্দব্রহ্মময়ং বেণুং বাদয়ংতং মুখাংবুজে ।
বিলাসিনীগণবৃতং স্বৈঃ স্বৈরংশৈরভিষ্টুতম্ ॥ 26 ॥

অথ বেণুনিনাদস্য ত্রয়ীমূর্তিময়ী গতিঃ ।
স্ফুরংতী প্রবিবেশাশু মুখাব্জানি স্বয়ংভুবঃ ।
গাযত্রীং গাযতস্তস্মাদধিগত্য সরোজজঃ ।
সংস্কৃতশ্চাদিগুরুণা দ্বিজতামগমত্ততঃ ॥ 27 ॥

ত্রয্যা প্রবুদ্ধোঽথ বিধির্বিজ্ঞাততত্ত্বসাগরঃ ।
তুষ্টাব বেদসারেণ স্তোত্রেণানেন কেশবম্ ॥ 28 ॥

চিংতামণিপ্রকরসদ্মসু কল্পবৃক্ষ
লক্ষাবৃতেষু সুরভীরভিপালয়ংতম্ ।
লক্ষ্মীসহস্রশতসংভ্রমসেব্যমানং
গোবিংদমাদিপুরুষং তমহং ভজামি ॥ 29 ॥

বেণুং ক্বণংতমরবিংদদলাযতাক্ষং
বর্হাবতংসমসিতাংবুদসুংদরাংগম্ ।
কংদর্পকোটিকমনীযবিশেষশোভং
গোবিংদমাদিপুরুষং তমহং ভজামি ॥ 30 ॥

আলোলচংদ্রকলসদ্বনমাল্যবংশী-
-রত্নাংগদং প্রণযকেলিকলাবিলাসম্ ।
শ্য়ামং ত্রিভংগললিতং নিযতপ্রকাশং
গোবিংদমাদিপুরুষং তমহং ভজামি ॥ 31 ॥

অংগানি যস্য় সকলেংদ্রিযবৃত্তিমংতি
পশ্য়ংতি পাংতি কলয়ংতি চিরং জগংতি ।
আনংদচিন্মযসদুজ্জ্বলবিগ্রহস্য়
গোবিংদমাদিপুরুষং তমহং ভজামি ॥ 32 ॥

অদ্বৈতমচ্যুতমনাদিমনংতরূপং
আদ্য়ং পুরাণপুরুষং নবয়ৌবনং চ ।
বেদেষু দুর্লভমদুর্লভমাত্মভক্তৌ
গোবিংদমাদিপুরুষং তমহং ভজামি ॥ 33 ॥

পংথাস্তু কোটিশতবত্সরসংপ্রগম্য়ো
বায়োরথাপি মনসো মুনিপুংগবানাম্ ।
সোঽপ্যস্তি যত্প্রপদসীম্ন্যবিচিংত্যতত্ত্বে
গোবিংদমাদিপুরুষং তমহং ভজামি ॥ 34 ॥

একোঽপ্যসৌ রচয়িতুং জগদংডকোটিং
যচ্ছক্তিরস্তি জগদংডচয়া যদংতঃ ।
অংডাংতরস্থপরমাণুচয়াংতরস্থং
গোবিংদমাদিপুরুষং তমহং ভজামি ॥ 35 ॥

যদ্ভাবভাবিতধিয়ো মনুজাস্তথৈব
সংপ্রাপ্য় রূপমহিমাসনয়ানভূষাঃ ।
সূক্তৈর্যমেব নিগমপ্রথিতৈঃ স্তুবংতি
গোবিংদমাদিপুরুষং তমহং ভজামি ॥ 36 ॥

আনংদচিন্মযরসপ্রতিভাবিতাভি-
-স্তাভির্য় এব নিজরূপতয়া কলাভিঃ ।
গোলোক এব নিবসত্যখিলাত্মভূতো
গোবিংদমাদিপুরুষং তমহং ভজামি ॥ 37 ॥

প্রেমাংজনচ্ছুরিতভক্তিবিলোচনেন
সংতঃ সদৈব হৃদয়েষু বিলোকয়ংতি ।
যং শ্য়ামসুংদরমচিংত্যগুণস্বরূপং
গোবিংদমাদিপুরুষং তমহং ভজামি ॥ 38 ॥

রামাদিমূর্তিষু কলানিযমেন তিষ্ঠন্
নানাবতারমকরোদ্ভুবনেষু কিংতু ।
কৃষ্ণঃ স্বয়ং সমভবত্পরমঃ পুমান্ যো

গোবিংদমাদিপুরুষং তমহং ভজামি ॥ 39 ॥

যস্য় প্রভা প্রভবতো জগদংডকোটি-
-কোটিষ্বশেষবসুধাদি বিভূতিভিন্নম্ ।
তদ্ব্রহ্ম নিষ্কলমনংতমশেষভূতং
গোবিংদমাদিপুরুষং তমহং ভজামি ॥ 40 ॥

মায়া হি যস্য় জগদংডশতানি সূতে
ত্রৈগুণ্যতদ্বিষযবেদবিতাযমানা ।
সত্ত্বাবলংবিপরসত্ত্বং বিশুদ্ধসত্ত্বং
গোবিংদমাদিপুরুষং তমহং ভজামি ॥ 41 ॥

আনংদচিন্মযরসাত্মতয়া মনঃসু
যঃ প্রাণিনাং প্রতিফলন্ স্মরতামুপেত্য় ।
লীলায়িতেন ভুবনানি জযত্যজস্রং
গোবিংদমাদিপুরুষং তমহং ভজামি ॥ 42 ॥

গোলোকনাম্নি নিজধাম্নি তলে চ তস্য়
দেবি মহেশহরিধামসু তেষু তেষু ।
তে তে প্রভাবনিচয়া বিহিতাশ্চ যেন
গোবিংদমাদিপুরুষং তমহং ভজামি ॥ 43 ॥

সৃষ্টিস্থিতিপ্রলযসাধনশক্তিরেকা
ছায়েব যস্য় ভুবনানি বিভর্তি দুর্গা ।
ইচ্ছানুরূপমপি যস্য় চ চেষ্টতে সা
গোবিংদমাদিপুরুষং তমহং ভজামি ॥ 44 ॥

ক্ষীরং যথা দধি বিকারবিশেষয়োগাত্
সংজাযতে ন হি ততঃ পৃথগস্তি হেতোঃ ।
যঃ শংভুতামপি তথা সমুপৈতি কার্য়া-
-দ্গোবিংদমাদিপুরুষং তমহং ভজামি ॥ 45 ॥

দীপার্চিরেব হি দশাংতরমভ্যুপেত্য়
দীপাযতে বিবৃতহেতুসমানধর্মা ।
যস্তাদৃগেব হি চ বিষ্ণুতয়া বিভাতি
গোবিংদমাদিপুরুষং তমহং ভজামি ॥ 46 ॥

যঃ কারণার্ণবজলে ভজতি স্ম যোগ-
-নিদ্রামনংতজগদংডসরোমকূপঃ ।
আধারশক্তিমবলংব্য় পরাং স্বমূর্তিং
গোবিংদমাদিপুরুষং তমহং ভজামি ॥ 47 ॥

যস্য়ৈকনিশ্বসিতকালমথাবলংব্য়
জীবংতি লোমবিলজা জগদংডনাথাঃ ।
বিষ্ণুর্মহান্ স ইহ যস্য় কলাবিশেষো
গোবিংদমাদিপুরুষং তমহং ভজামি ॥ 48 ॥

ভাস্বান্ যথাশ্মশকলেষু নিজেষু তেজঃ
স্বীয়ং কিযত্প্রকটয়ত্যপি তদ্বদত্র ।

ব্রহ্মা য এষ জগদংডবিধানকর্তা
গোবিংদমাদিপুরুষং তমহং ভজামি ॥ 49 ॥

যত্পাদপল্লবযুগং বিনিধায় কুংভ-
-দ্বংদ্বে প্রণামসময়ে স গণাধিরাজঃ ।
বিঘ্নান্ বিহংতুমলমস্য় জগত্ত্রযস্য়
গোবিংদমাদিপুরুষং তমহং ভজামি ॥ 50 ॥

অগ্নির্মহী গগনমংবু মরুদ্দিশশ্চ
কালস্তথাত্মমনসীতি জগত্ত্রয়াণি ।
যস্মাদ্ভবংতি বিভবংতি বিশংতি যং চ
গোবিংদমাদিপুরুষং তমহং ভজামি ॥ 51 ॥

যচ্চক্ষুরেষ সবিতা সকলগ্রহাণাং
রাজা সমস্তসুরমূর্তিরশেষতেজাঃ ।
যস্য়াজ্ঞয়া ভ্রমতি সংভৃতকালচক্রো
গোবিংদমাদিপুরুষং তমহং ভজামি ॥ 52 ॥

ধর্মোঽথ পাপনিচয়ঃ শ্রুতযস্তপাংসি
ব্রহ্মাদিকীটপতগাবধযশ্চ জীবাঃ ।
যদ্দতমাত্রবিভবপ্রকটপ্রভাবা
গোবিংদমাদিপুরুষং তমহং ভজামি ॥ 53 ॥

যস্ত্বিংদ্রগোপমথবেংদ্রমহো স্বকর্ম-
-বংধানুরূপফলভাজনমাতনোতি ।
কর্মাণি নির্দহতি কিংতু চ ভক্তিভাজাং
গোবিংদমাদিপুরুষং তমহং ভজামি ॥ 54 ॥

যং ক্রোধকামসহজপ্রণয়াদিভীতি-
-বাত্সল্যমোহগুরুগৌরবসেব্যভাবৈঃ ।
সংচিংত্য় তস্য় সদৃশীং তনুমাপুরেতে
গোবিংদমাদিপুরুষং তমহং ভজামি ॥ 55 ॥

শ্রিয়ঃ কাংতাঃ কাংতঃ পরমপুরুষঃ কল্পতরবো
দ্রুমা ভূমিশ্চিংতামণিগণময়ি তোযমমৃতম্ ।
কথা গানং নাট্য়ং গমনমপি বংশী প্রিযসখি
চিদানংদং জ্য়োতিঃ পরমপি তদাস্বাদ্যমপি চ ।
স যত্র ক্ষীরাব্ধিঃ স্রবতি সুরভীভ্যশ্চ সুমহান্
নিমেষার্ধাখ্য়ো বা ব্রজতি ন হি যত্রাপি সময়ঃ ।
ভজে শ্বেতদ্বীপং তমহমিহ গোলোকমিতি যং
বিদংতস্তে সংতঃ ক্ষিতিবিরলচারাঃ কতিপয়ে ॥ 56 ॥

অথোবাচ মহাবিষ্ণুর্ভগবংতং প্রজাপতিম্ ।
ব্রহ্মন্ মহত্ত্ববিজ্ঞানে প্রজাসর্গে চ চেন্মতিঃ ।
পংচশ্লোকীমিমাং বিদ্য়াং বত্স দত্তাং নিবোধ মে ॥ 57 ॥

প্রবুদ্ধে জ্ঞানভক্তিভ্য়ামাত্মন্য়ানংদচিন্ময়ী ।
উদেত্যনুত্তমা ভক্তির্ভগবত্প্রেমলক্ষণা ॥ 58 ॥

Published on: Jul, 30 2025 14:36

প্রমাণৈস্তত্ সদাচারৈস্তদভ্যাসৈর্নিরংতরম্ ।
বোধযনাত্মনাত্মানং ভক্তিমপ্যুত্তমাং লভেত্ ॥ 59 ॥

যস্যাঃ শ্রেযস্করং নাস্তি যযা নির্বৃতিমাপ্নুযাত্ ।
যা সাধযতি মামেব ভক্তিং তামেব সাধযেত্ ॥ 60 ॥

ধর্মানন্যান্ পরিত্যজ্য মামেকং ভজ বিশ্বসন্ ।
যাদৃশী যাদৃশী শ্রদ্ধা সিদ্ধির্ভবতি তাদৃশী ।
কুর্বন্নিরংতরং কর্ম লোকোঽযমনুবর্ততে ।
তেনৈব কর্মণা ধ্যাযন্মাং পরাং ভক্তিমিচ্ছতি ॥ 61 ॥

অহং হি বিশ্বস্য চরাচরস্য
বীজং প্রধানং প্রকৃতিঃ পুমাংশ্চ ।
মযাহিতং তেজ ইদং বিভর্ষি
বিধে বিধেহি ত্বমথো জগংতি ॥ 62 ॥

ইতি শ্রী ব্রহ্ম সংহিতা সংপূর্ণম্ ।